नं.न.-७३

ओपाल ~~[illegible]~~

# गायत्रीहृदय वगैरे

संपूर्ण

६१८ / स्तो. ५१५

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)



(2)





"Joint project of the Rajawade Sanshodhan Mandal, Dhule ... Mumbai."

(3)



(५)



Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

ॐ॥ श्रीगणेशायनमः ॥ श्रीसरस्वत्यैनमः ॥ श्रीपरमगुरुभ्योनमः ॥
श्रीगायत्र्यैनमः ॥ अथ भूशुद्धिः लिख्यते ॥ अथ संकल्पप्रयोगः ॥ अ
द्येत्यादि एवंगुणविशेषण विशिष्टायां शुभपुण्यतिथौ मम आत्मनः
यथोक्तफलप्राप्त्यर्थं वाङ्मनआदिकृतकर्मदोषपरिहारार्थं श्रीइष्टदेवता
प्रीत्यर्थं श्रीगुरुब्राह्मणसन्निधौ तथाच भूशुध्यादिकर्मकरिष्ये ॥ अथभस्म
मंत्रः ॥ ॐ त्र्यंबकंयजामहेसुगंधिंपुष्टिवर्धनं उर्वारुकमिवबंधनान्मृत्योर्मु
क्षीयमामृतात् ॥ अनेनमंत्रेणविभूतिधारणंकुर्यात् ॥ ततोत्रिवारमाचम
नं ॥ ॐ केशवायनमः ॥ ॐ नारायणायनमः ॥ ॐ माधवायनमः ॥ इति
आचमनं ॥ ततोशिखामंत्रः ॥ ॐ उर्ध्वकेशिविरूपाक्षि मांसशोणितभोज

(6)

भू.शु० ने ॥ तिष्ठदेविशिखाबंधे चामुंडेचापराजिते ॥इतिशिखामंत्रः ततोआस
नमंत्रः ॥ पृथ्वित्वयेतिमंत्रस्य मेरुपृष्ठऋषिः कूर्मोदेवता सुतलछंदः आ
॥ १ ॥ सनेविनियोगः ॥ ॐ पृथ्वित्वयाधृतालोका देवित्वंविष्णुनाधृता त्वंच
धारयमांदेवि पवित्रंकुरुचासनम् ॥ हस्तेनजलमादाय जपस्थलंसंप्रोक्ष
येत् चतुष्कोणंलिखेद्वृत्तं मुखेह्रींकारमेवच पृष्ठेमन्मथबीजंतु चतुष्कोणे
षुतारकं॥कादीन्वर्गाँल्लिखेन्मध्ये कलाभिःपरिवेष्टयेत् कूर्मयंत्रमितिप्रोक्तं
सर्वकार्यार्थसिद्धिदम् ॥ मध्येहुंफट्क्रियासाध्यं चैलाजिनकुशोत्तरं ॥ ॐ आ
धारशक्त्यैनमः॥ भूम्यंतरिक्षआकाशास्थितान् भूतप्रेतपिशाचानुत्तरद्वारदे
शीयनाराचमुद्रयानिःसार्य्य ॥ अपक्रामंतुभूतानि पिशाचाःसर्वतोदिशं स ॥ १ ॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(6A)

वैंषामविरोधेन ब्रह्मकर्मसमारभेत् ॥ इतिभूशुद्धिः ॥ ततोभूतशुद्धिंकुर्यात् ॥
धर्मकंदसमुद्भूतंज्ञाननालसुशोभितं ॥ ऐश्वार्याष्टदलोपेतंपरंवैराग्यकर्णि
कं ॥ अधोमुखंतुहृत्पद्मं प्रणवेनोर्ध्वमुन्नयेत् ॥ प्रणवेनविकसितंकृत्वा त
त्रस्थंजीवात्मानंहंसमंत्रेणांकुशमुद्रयासुषुम्णानाडिमार्गेणब्रह्मरंध्रंनीत्वा॥
तत्रसहस्त्रदलकर्णिकांतर्गतेनपरमात्मनासहैक्यभावमापादयेत् ॥ ततो
पापपुरुषस्यदहनविधानंकुर्यात् ॥ वामकुक्षिस्छितंपापंपुरुषंकज्जलप्रभं ॥
ब्रह्महत्याशिरस्कंचस्वर्णस्तेयभुजद्वयं॥सुरापानहृदायुक्तंगुरुतल्पकटिद्व
यं ॥ तत्संसार्गिपदद्वंद्वमंगप्रत्यंगपातकं उपपातकरोमाणंरक्तश्मश्रुविलोच
नं॥ अधोमुखंकृष्णवर्णमंगुष्ठपरिमाणकं खड्गचर्मधरंदुष्टंवामकुक्षौविचिंतये

"Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai"

(२)

भूशु० त् ॥ इतिध्यात्वा ॥ ततोयमितिवायुबीजेनपापपुरुषं षोडश वारंपूरकेनसं
शोष्यततोरमितिअग्निबीजेनकुंभकेन चतुःषष्टि वांरपापपुरुषंसंदह्य पुनः
॥२॥ यमितिवायुबीजेनरेचकेन द्वात्रिंशत् वारंपापपुरुषंदक्षिणनासापुटेनभस्म
बहिर्निःसार्य्य ॥ ततोवमितिवरुणबीजेन द्वात्रिंशत्वारंपापपुरुषंममृतीकृ
त्य ॥ततोलमितिप्रथ्वीबीजेन चतुःषष्टि वारंपापपुरुषंदढीकृत्वाविभावये
त् ततोहमितिआकाशबीजेन षोडश वारंपुरुषंसावयवंविचिंतयेत् ॥
ततो पादादिजानुपर्यंतंपृथ्वीमंडलंचतुष्कोणंचतुर्दिक्षुवज्रलांछितंतन्मध्ये
पीतवर्णंब्रह्मदैवत्यंलंबीजयुक्तंध्यायेत्॥लंभूम्यैनमः॥ततोजान्वादिनाभिप
र्यंत अपामंडलंअर्द्धचंद्राकारंपद्मद्वयलांछितंतन्मध्येस्वेतवर्णंविष्णुदैवत्यं ॥ २ ॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(7A)

वंबीजयुक्तंध्यायेत् ॥वंअद्भ्योनमः॥नाभ्यादिहृदयपर्यंतं अग्निमंडलंतत्रत्रि
कोणंस्वस्तिकलांछितंतन्मध्येरक्तवर्णंरुद्रदैवत्यंरंबीजयुक्तंध्यायेत्॥ रंअग्न
येनमः॥ हृदयादिभ्रूमध्यपर्यंतंवायुमंडलंषट्कोणंषट्बिंदुलांछितंतन्मध्ये
धूम्रवर्णंईश्वरदैवत्यंयंबीजयुक्तंध्यायेत्॥ यंवायवेनमः॥ भ्रूमध्यादिब्रह्मरंध्र
पर्यंतंआकाशमंडलंवर्तुलाकारंध्वजलांछितंतन्मध्येनीलवर्णं सदाशिवदैव
त्यंहंबीजयुक्तंध्यायेत् ॥ एवंस्थूलशरीरे पंचमहाभूतानिध्यात्वा तत्प्रविला
पनंकुर्यात् ॥ पृथिवीमप्सुप्रविलापयामीति अपोग्नौ ॥ अग्निंवायौ ॥
वायुमाकाशे ॥ आकाशंपंचतन्मात्राहंकारमहदात्मिकायांमातृकासंज्ञ
कशब्दब्रह्मस्वरूपायां हृल्लेखार्थभूतायांप्रकृतिरूपमायायांप्रविलापयामि

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(४)

भूशु० तथाविधांमायांचनित्यशुद्धबुद्धमुक्तस्वभावेस्वात्मप्रकाशरूपेसत्यज्ञानानंद
लक्षणेपरमकारणे परमार्थभूते परब्रह्मणि प्रविलापयामी तिसमस्तदे
॥३॥ हादिप्रपंचंब्रह्मणि प्रविलाप्यतच्चनित्यशुद्धबुद्धमुक्तस्वभावंसच्चिदानंदस्व
रूपं परिपूर्णपरंब्रह्मैवाहमस्मी तिचिरकालंभावयेत् ॥ विशुद्धपुरुषाकारं
ब्रह्मरंध्रगतंस्मरेत् ॥ आकाशादीनिभूतानि पुनरुत्पादयेतत्तः परब्रह्मणः
सकाशात्प्रकृतिःप्रकृतेर्महान्॥ महतोहंकारः अहंकारादाकाशः ॥आका
शाद्वायुः वायुरग्निः ॥ अग्नेरापः ॥ अद्भ्यःप्रथिवी ॥ प्रथिव्याऔषधयः ॥
औषधिभ्योन्नं॥ अन्नाद्रेतः ॥ रेतसः पुरुषःसवाएषपुरुषोन्नरसमय इति ॥ ३ ॥
स्पष्ट्वा ॥ एवंशरीरंतेजोमयंपुण्यात्मकंसकलपुरुषार्थसाधकंदेवताराधन

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(8A)

योग्यमुत्पन्नंतस्मिन्निर्मलेशरीरेनिर्मुक्तसमस्तोपाधौ प्राणान्प्रतिष्ठापयेत्
इतिभूतशुद्धिः ॥ ततोप्राणप्रतिष्ठांकुर्यात् ॥ ॐ अस्यश्रीप्राणप्रतिष्ठामंत्र
स्य ब्रह्माविष्णुरुद्राऋषयः ऋग्यजुः सामानिछंदांसि पराप्राणशक्तिर्देव
ता आँबीजं ऱ्हींशक्तिः क्रोंकीलकं मम प्राणप्रतिष्ठायांविनियोगः ॥ इति
कृतांजलिरुत्कान्यसेत् ॥ ॐ ब्रह्माविष्णुरुद्रेभ्योऋषिभ्योनमः शिरसि ऋग्य
जुःसामभ्योश्छंदोभ्योनमःमुखे प्राणशक्त्यैदेवतायैनमःहृदये आँ बीजाय
नमः गुह्ये ऱ्हीं शक्तयेनमः पादयोः क्रोँ कीलकायनमः नाभौ इतिऋ
ष्यादिन्यासः ॥ ॐ आँऱ्हींक्रोँ ॐ अँकँखँगँघँङँ ॥ आंक्रोंऱ्हीं आंपृथिव्या
पस्तेजोवायुराकाशात्मनेअंगुष्ठाभ्यांहृदयायनमः ॥ ॐ आंऱ्हींक्रों ॐ इं

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(९)

भूत० ॥ ४ ॥

चंछंजंझंञं ईं क्रौं ह्रींआं शब्दस्पर्शरूपरसगंधात्मने तर्जनीभ्यांशिरसेस्वा
हा॥ ॐ आँ ह्रीं क्रों ॐ उंटंठंडंढणं उं क्रौंह्रींआं श्रोत्रत्वक्चक्षुजिव्हा
घ्राणात्मनेमध्यमाभ्यांशिखायैवषट ॥ ओं आं ह्रीं क्रों ओं एं तंथंदंधंनं
ऐं क्रौं ह्रींआं वाकपाणिपादपायुपस्थात्मनेअनामिकाभ्यांकवचायहुं ॥
ओं आं ह्रीं क्रों ओं पंफंबंभंमं॥ ओं क्रौं ह्रींआं वक्तव्यादिविसर्गानंदात्म
नेकनिष्ठिकाभ्यांनेत्रत्रयायवौषट ॥ ओं आं ह्रीं क्रों ओं अंयंरंलंवंशंषंसं
हंक्षंअः क्रौं ह्रींआं मनोबुद्धिअहंकाराचित्तविज्ञानात्मनें करतलकरपृष्ठा
भ्या मस्त्रायफट् ॥ अथध्यानं ॥ रक्ताब्धिपोतारुणपद्मसंस्थां पाशांकुशा
विक्षुसरासबाणान् ॥ शूलंकपालंदधतींकराब्जै रक्तांत्रिनेत्राप्रणमामिदे ॥ ४ ॥

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai joint project

(9A)

वीम् ॥ इतिध्यात्वा ॥ हृदिहस्तंनिधाय ॥ ओं आँर्‍हींक्रों ओं अंयंरंलं वंशंषंसंहंळंक्षं मम प्राणाइहप्राणाः ओं आंर्‍हींक्रों ओं अंयंरंलंवंशंषंसंहं ळंक्षं मम जीवइहस्थितः ॥ ओं आंर्‍हींक्रों ओं अंयंरंलंवंशंषंसंहंळंक्षं मम सर्वेंद्रियाणि काय वाङ्मनश्चक्षुःश्रोत्र जिव्हा घ्राणइहैवागत्यसुखं चिरंतिष्ठंतुस्वाहा ॥ असुनीतेपुनरस्मासुचक्षुः पुनः प्राणमिहनोर्धेहिभो गं ॥ ज्योक्पस्येमसूर्यमुच्चरंतमनुमतेमृळयानः स्वस्तिगर्भाधानादिपंचद शसंस्कारार्थं पंचदशप्रणवावृत्तिंकरिष्ये ॥ ओं ॥ १५ ॥ अमृतंवैप्रा णः ॥ अमृतमापः ॥ प्राणन्नेवयथास्थानमुपव्हते ॥ इतिप्राणप्रतिष्ठा ॥ ततोअंतरमात्रिका ॥ ॐ अस्यश्रीअंतरमातृकामंत्रस्य ॥ ब्रह्माऋषिः ॥ गा

Joint Project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

॥मा०॥ यत्रीछंदः ॥ अंतर्मातृकासरस्वतीदेवतायैनमः हृदये ॥ ॐ हंनमःगुह्ये ॥
स्वरेभ्यः शक्तिभ्योनमः पादयोः ॥ अव्यक्तकीलकायनमः सर्वांगे ॥
॥५॥ इतिऋष्यादिन्यासः ॥ ॐ अँकँखँगँघँङँ आँ अंगुष्टाभ्यांनमः॥ ॐ इँचँछँजँ
झँञँ इँ तर्जनीभ्यांस्वाहा ॥ ॐ उँटँठँडँढँणँ ॐ मध्यमाभ्यांवषट् ॥ ॐ एँ
तँथँदँधँनँ ऐँ अनामिकाभ्यांहुं॥ ॐ औं पँफँबँभँमँ औं कनिष्ठिकाभ्यांवौ
षट् ॐ अँयँरँलँवँशँषँसँहँळँक्षँ अः करतलकरपृष्टाभ्यामस्त्रायफट् ॥
इत्यंगुष्टादिन्यासः ॥ ॐ अँकँखँगँघँङँ आँ हृदयायनमः ॥ ॐ इँ
चँछँजँझँञँ ईँ शिरशेस्वाहा ॥ आँ उँटँठँडँढँणँ शिखायैवषट् ॥ आँ एँतँ
थँदँधँनँ ऐँ कवचायहुंः ॥ आँ आँपँफँबँभँमँ औं नेत्रत्रयायवौषट् ॥ ओं ॥५॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(10A)

अँयँरँलँवँशँषँसँहँळँक्षँ अः अस्त्रायफट् ॥ इतिहृदयादिन्यासः ॥ अथ
ध्यानं ॥ ऐंकारिघनरक्षपंकजदले श्रीचक्रमध्यस्छले ॥ इडा पिंगलमध्य
पूर्णनयने ब्रह्मांडगंडस्छले ॥ इंदुवर्णधर्नधरा बहुविधा पुण्यायुधामो
हनी तारापूर्णमुखांबुजेशुभकरी अंतर्महामातृके ॥इतिअंतरमातृका ततो
बहिर्मातृकान्यासः ॥ अथध्यानं ॥ पूर्ववत्हृदयादिन्यासंकुर्यात्॥ आधारे
लिंगनाभौप्रकटितहृदयेतालुमूले ललाटे ॥ द्वेपत्रेषोडसारेद्विदशदशदले
द्वादशार्धेचतुष्केवासांते बालमध्येडफकठसहिते कंठदेशेस्वराणां ॥ हंक्षंत
त्वार्थयुक्तंसकलदलगतंवर्णरूपंनमामि॥ १ ॥ततोकंठेविशुद्धिःचक्रेषोडशद
लेषोडशकलाविन्यसेत्॥अंनमः॥ आंनमः॥ इंनमः ईंनमः उंनमः॥ऊंनम

A joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(11)

||मा०|| ऋंनमः ॥ ॠंनमः ॥ ऌंनमः ॥ ॡंनमः ॥ एंनमः ऐंनमः ॥ ओंनमः ॥ औं
नमः ॥ अंनमः ॥ अःनमः ॥ इतिकंठे ॥ ततोहृदये ॥ अनाहतचक्रे द्वा
||६|| दशदलेद्वादशवर्णान्विन्यशेत् ॥ कंनमः॥ खंनमः ॥ गंनमः ॥ घंनमः
ङंनमः॥ चंनमः॥ छंनमः॥ जंनमः ॥ झंनमः॥ ञंनमः ॥ टंनमः॥ ठंनमः
इतिहृदये ॥ ततोनाभौ ॥ मणिपरचक्रेदशदलकमलेदशवर्णान्विन्यशे
त्॥ डंनमः ॥ ढंनमः॥ णंनमः॥ तंनमः॥ थंनमः दंनमः ॥ धंनमः नंनमः ॥पं
नमः ॥ फंनमः ॥ अेतान्दशवर्णान्नाभिस्थानगतेदशदलेविन्यशेत् ॥
ततोलिंगे ॥ बंनमः॥ भंनमः मंनमः ॥ यंनमः ॥ रंनमः ॥ लंनमः ॥ ए ||६||
तान्षट्वर्णान्लिंगस्थाने ॥ षट्दलेविन्यसेत् ॥ ततोआधारे ॥ वंन

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

मः ॥ शंनमः॥ षंनमः ॥ संनमः ॥ एतान्चतुर्वर्णान् आधारस्थानगते
चतुर्दलेविन्यसेत् ॥ ततोललाटे ॥ हंनमः॥ क्षंनम ॥ एतान् द्वयवर्णान्
भ्रुमध्यगते ॥ द्विदलेविन्यशेत ॥ ततोसहस्त्रदलेकमले ॥ ऐंह्रींसौं ॐ अंन
मः ॥ आंनमः ॥ इंनमः ॥ ईंनमः ॥ उंनमः ॥ ऊंनम॥ ऋंनमः ॥ ॠं
नमः॥ ऌंनमः ॥ ॡंनम ॥ एंनमः ॥ ऐंनमः ॥ ओंनमः औंनमः ॥
अंनमः ॥ अःनमः ॥ कंनमः ॥ खंनमः ॥ गंनमः ॥ घंनमः ॥ ङं
नमः ॥ चंनमः॥छंनमः जंनमः ॥ झंनमः ॥ ञंनमः॥टंनमः॥ ठंनमः॥
डंनमः ॥ ढंनमः ॥ णंनमः ॥ तंनमः ॥ थंनमः॥ दंनमः ॥ धंनमः ॥
नंनमः॥ पंनमः ॥ फंनमः ॥ बंनमः ॥ भंनमः ॥ मंनमः॥ यंनमः ॥

" Joint project of Rajawade Sanshodhan Mandal Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(12)

भू.शु० रंनमः ॥ लंनमः ॥ वंनमः ॥ शंनमः ॥ षंनमः ॥ संनमः ॥ हंनमः ॥ ळंन
मः ॥ क्षंनमः ॥ इतिसहस्रदलेविन्यसेत ॥ इतिअंतर्मातृकान्यासः ॥ गायत्रि
॥७॥ छंदः मुखे ॥ बहिर्मातृकासरस्वत्यैनमः हृदये ॥ हलोबीजायनमः गुह्ये
स्वराःशक्तयेनमः पादयोः ॥ क्षं कीलकं सर्वांगेषु ॥ बहिर्मातृकान्यासेवि
नियोगः ॥ ओं अंकंखंगंघंङं ॥ ओं आं अंगुष्ठाभ्यांत्हृदयायनमः ॥ ओं इं
चंछंजंझंञं ई ओं तर्जनीभ्यांशिरसेस्वाहा ॥ ओं उं टंठंडंढंणं ऊं ओं मध्य
माभ्यांशिखायैवषट् ॥ ओं एं तंथंदंधंनं ऐं ओं अनामिकाभ्यांकवचा
यहुं ॥ ओं ऊं पंफंबंभंमं ओं उं कनिष्ठिकाभ्यांनेत्रत्रयायवौषट् ॥ ओं अं ॥ ७ ॥
यरंलंवंशंषंसंहंळंक्षंअः ओंकरतलकरपृष्ठाभ्यांअस्त्रायफट् ओं भूर्भुवःस्वरो

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(12A)

मितिदिग्वंधः ॥ अथध्यानं ॥ पंचाशद्वर्णभेदैर्विहितवदनदोः पादहृत्कु
क्षिवक्षो देशांभास्वत्कपर्दा ममृतशशिकलामिंदुकुंदावदातां ॥ अक्षस्त्र
क्कुंभचिंतां लिखितवरकरां त्र्यक्षरां पद्मसंस्था मच्छाकल्पामरुच्छत् स्त
नजघनभरां भारतींतांनमामि ॥ १ ॥ अंनमः शिरसि ॥ आंनमः
मुखे ॥ इंनमः दक्षिणनेत्रे ॥ ईंनमः वामनेत्रे ॥ उंनमः दक्षिणश्रोत्रे ॥
ऊंनमः वामश्रोत्रे ॥ ऋंनमः दक्षिणनासापुटे ॥ ॠंनमः वामनासापुटे ॥
ॐ ऌंनमः दक्षिणगंडे ॥ ॐ ॡंनमः वामगंडे ॥ ॐ एंनमः उर्ध्वोष्ठे॥
ऐंनमः अधरोष्ठे ॥ ॐ ओंनमः ऊर्ध्वदंतपंक्तैः॥ ॐ औंनमः अधोदंतपंक्तैः॥
ॐ अंनमः शिरसि॥ ॐ अःनमः मुखे॥ ॐ कंनमः दक्षिणवाहुमूले॥ ॐ खं

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai, Joint project of the

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com